# Shri Sarasvati Stotram

# શ્રીસરસ્વતીસ્તોત્રમ્

## Document Information

Text title : sarasvatIstotram

File name : sarasvatIstotramPS.itx

Category : devii, puShpAshrIvatsan, sarasvatI, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Stotra Pushapavali

Latest update : October 13, 2021

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

October 13, 2021

*sanskritdocuments.org*

# શ્રીસરસ્વતીસ્તોત્રમ્

ૐ

શ્રીરામજયમ્ ।

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ૐ સરસ્વત્યૈ ચ વિદ્મહે । વાગર્થાયૈ ચ ધીમહિ ।
તન્નો વાણી પ્રચોદયાત્ ॥

ધ્યાનમ્ -
નમસ્તુભ્યં વરે દેવિ વીણાપુસ્તકધારિણિ ।
વિદ્યાસમ્પત્તિદે વાણિ સરસ્વતિ નમોસ્તુ તે ॥ ૧॥

ઐંબીજપૂજિતે દેવિ વીણાસઙ્ગીતમોદિતે ।
જ્ઞાનમોક્ષકવિસ્ફૂર્તે સરસ્વતિ નમોસ્તુ તે ॥ ૨॥

વાગ્દેવીં સ્વરમાધુર્યાં સઙ્ગીતકવિતાવરામ્ ।
વીણાપુસ્તકસંવાસાં વાણીં વન્દે સરસ્વતીમ્ ॥ ૩॥

વીણાગાનપ્રવીણાં ચ વિદ્યાકૂટવિલાસિનીમ્ ।
ગાનમાધુર્યવાચં ચ વાણીં વન્દે સરસ્વતીમ્ ॥ ૪॥

વીણાસયુક્તકણ્ઠાં ચ વીણાઽભેદમૃદુસ્વરામ્ ।
વીણાસુસ્વરસાનન્દાં વાણીં વન્દે સરસ્વતીમ્ ॥ ૫॥

જ્ઞાનમોક્ષપ્રદાત્રીં ચ જ્ઞાનિસજ્જનવલ્લભામ્ ।
જ્ઞાનસદ્ગુરુરૂપાં ચ વાણીં વન્દે સરસ્વતીમ્ ॥ ૬॥

વાગર્થપુષ્ટિસંયુક્તાં વાગ્વર્ણવર્ણમાલિકામ્ ।
વાક્સમ્પત્સમ્પ્રદાત્રીં ચ વાણીં વન્દે સરસ્વતીમ્ ॥ ૭॥

ગઙ્ગાપ્રવાહવાગ્વર્ષાં  વાક્શબ્દલયવાસિનીમ્ ।
શ્લોકશૈલીસુનૃત્યાં શ્રીં વાણીં વન્દે સરસ્વતીમ્ ॥ ૮॥

રાગતાલગતિસ્થામ્બાં લયલાસ્યસુવાચિકામ્ ।
કવિતોલ્લોલલોલાં ચ વાણીં વન્દે સરસ્વતીમ્ ॥ ૯॥

શારદાં સ્વરસામોદાં રાગદાં વરદાં વરામ્ ।
વરસુસ્વરવિદ્યાં ચ વાણીં વન્દે સરસ્વતીમ્ ॥ ૧૦॥

શ્વેતપુષ્પાસનાસન્નાં શ્વેતમુત્યસ્મિતાનનામ્ ।
શ્વેતવસ્ત્રસુભૂષાં ચ વાણીં વન્દે સરસ્વતીમ્ ॥ ૧૧॥

હિમશ્વેતાલયાં શ્વેતાં હિમશૃઙ્ગવિકાસિનીમ્ ।
હિમશ્વેતાસરાં ગઙ્ગાં વાણીં વન્દે સરસ્વતીમ્ ॥ ૧૨॥

સંસારતાપશામ્યાં ચ સંસારદુઃખમોચનીમ્ ।
સઙ્ગીતસત્સુખાવાહાં સ્તુત્યાં વન્દે સરસ્વતીમ્ ॥ ૧૩॥

ત્યાગરાજસુવાક્સંસ્થાં શિષ્યાપુષ્પાનુતિસ્થિરામ્ ।
સઙ્ગીતસુસ્વરાં વાણીં બ્રાહ્મીં વન્દે સરસ્વતીમ્ ॥ ૧૪॥

સરસ્વત્યર્પણં સ્તોત્રં સરસ્વત્યાઃ કૃપોદ્ભવમ્ ।
સરસ્વત્યર્ચનં શ્રેષ્ઠં સરસ્વત્યાઃ કૃપાવહમ્ ॥ ૧૫॥

મઙ્ગલં માતૃકાયૈ ચ સરસ્વત્યૈ સુમઙ્ગલમ્ ।
વાણ્યૈ સઙ્ગીતવાણ્યૈ ચ ગીર્વાણ્યૈ શુભમઙ્ગલમ્ ॥ ૧૬॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા કૃતં
શ્રીસરસ્વતીસ્તોત્રં ગુરૌ સમર્પિતમ્ ।
ૐ શુભમસ્તુ ।

Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

---

*Shri Sarasvati Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be

reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on October 13, 2021

Please send corrections to *sanskrit@cheerful.com*